**22E**
**100 Marks**

# टिळक महाराष्ट्र विद्यापीठ, पुणे

**संस्कृत पारंगत (एम.ए.) बहि:स्थ**

**परीक्षा: जानेवारी – २०२३**

**सत्र १ ले**

**विषय: भरतनाट्यशास्त्र (22E314)**

| **दिनांक: ११/०१/२०२३** | **गुण : १००** | **वेळ : स. १०.०० ते १.००** |
|---|---|---|

**सूचना:** १) उजवीकडील अंक त्या प्रश्नांचे गुण दर्शवितात. २) सर्व प्रश्न सोडवणे अनिवार्य.

**प्र. १. मातृभाषया षण्णामनुवादं कुरुत।** **(३५)**

१. देवानां मानसी सृष्टिर्गृहेषूपवनेषु च । यत्नभावाभिनिष्पन्नाः सर्वे भावा हि मानुषाः ।।
तस्माद्देवकृतैर्भावैर्न विस्पर्धेत मानुषः । मानुषस्य तु गेहस्य सम्प्रवक्ष्यामि लक्षणम् ।।

२. कार्यं द्वारद्वयं चात्र नेपथ्यगृहकस्य तु । पूरणे मृत्तिका चात्र कृष्णा देया प्रयत्नतः ।।
लाङ्गलेन समुत्कृष्य निर्लोष्टतृणशर्करम् । लाङ्गले शुद्धवर्णौ तु धुर्यौ योज्यौ प्रयत्नतः ।।

३. अत ऊर्ध्वं न कर्तव्यः कर्तृभिर्नाट्यमण्डपः । यस्मादव्यक्तभावं हि तत्र नाट्यं व्रजेदिति ।।
मण्डपे विप्रकृष्टे तु पाठ्यमुच्चारितस्वरम् ।अनिस्सरणधर्मत्वाद्विस्वरत्वं भृशं व्रजेत् ।।

४. दृष्टा मया भगवतो नीलकण्ठस्य नृत्यतः । कैशिकी श्लक्ष्णनैपथ्या शृङ्गाररससम्भवा ।।
अशक्या पुरुषैः सा तु प्रयोक्तुं स्त्रीजनादृते । ततोऽसृजन्महातेजा मनसाऽप्सरसो विभुः ।।

५. ब्रह्मा कुटिलकं चैव भृङ्गारं वरुणः शुभम् । सूर्यश्छत्रं शिवस्सिद्धिं वायुर्व्यजनमेव च ।।
विष्णुः सिंहासनं चैव कुबेरो मुकुटं तथा । श्राव्यत्वं प्रेक्षणीयस्य ददौ देवी सरस्वती ।।

६. भारतीं सात्वतीं चैव वृत्तिमारभटीं तथा । समाश्रितः प्रयोगस्तु प्रयुक्तो वै मया द्विजाः ।।
परिगृह्य प्रणम्याथ ब्रह्मा विज्ञापितो मया । अथाह मां सुरगुरुः कैशिकीमपि योजय ।।

७. अर्धच्छिन्ने भवेत्सूत्रे स्वामिनो मरणं ध्रुवम् । त्रिभागच्छिन्नया रज्ज्वा राष्ट्रकोपो विधीयते ।।
छिन्नायां तु चतुर्भागे प्रयोक्तुर्नाश उच्यते । हस्तात्प्रभ्रष्टया वापि कश्चित्वपचयो भवेत् ।।

**प्र. २. ससन्दर्भं पञ्चानां स्पष्टीकरणं लिखत ।** **(३५)**

१. त्रैलोकस्यास्य सर्वस्य नाट्यं भावानुकीर्तनम्।

२. जग्राह पाठ्यं ऋग्वेदात् ।

३. त्वं पुत्रशतसंयुक्तः प्रयोक्ताऽस्य भवानघ ।

४. प्रमाणमेषां निर्दिष्टं हस्तदण्डसमाश्रयम् ।

५. अस्थिकीलकपालानि तृणगुल्मांश्च शोधयेत् ।।

६. सर्वेष्वेव तु निक्षेप्यं स्तम्भमूलेषु काञ्चनम् ।

**प्र.३. टिपण्णीद्वयं लिखत।** **(१५)**

१. पंचमवेदनिर्मितिः

२. मत्तवारणी

३. रज्जुग्रहणस्य तथा भूमिपरीक्षणस्य महत्त्वम्

**प्र. ४. सविस्तरंमेकं लिखत।** **(१५)**

१. नाट्यशास्त्रग्रंथस्य परिचयं लिखित्वा महत्त्वं स्पष्टीकुरुत।

२. नाट्यमण्डपनिर्माणस्य वैशिष्ट्यानि विवेचयत।

------------